.. Ekatmata Stotra ..

# ॥ एकात्मता स्तोत्रम् ॥

एकात्मता स्तोत्रम् ।

ॐ नमः सच्चिदानंदरूपाय परमात्मने ।
ज्योतिर्मयस्वरूपाय विश्वमांगल्यमूर्तये ॥ १॥

प्रकृतिः पंचभूतानि ग्रहलोकस्वरास्तथा ।
दिशः कालश्च सर्वेषां सदा कुर्वंतु मंगलम् ॥ २॥

रत्नाकराधौतपदां हिमालयकिरीटिनीम् ।
ब्रह्मराजर्षिरत्नाढ्याम् वन्दे भारतमातरम् ॥ ३॥

महेंद्रो मलयः सह्यो देवतात्मा हिमालयः ।
ध्येयो रैवतको विन्ध्यो गिरिश्चारावलिस्तथा ॥ ४॥

गंगा सरस्वती सिंधु ब्रह्मपुत्राश्च गंदकी ।
कावेरी यमुना रेवा कृष्णा गोदा महानदी ॥ ५॥

अयोध्या मथुरा माया काशी कांची अवंतिका ।
वैशाली द्वारका ध्येया पुरी तक्षशिला गया ॥ ६॥

प्रयागः पाटलीपुत्रं विजयानगरं महत् ।
इंद्रप्रस्थं सोमनाथस्तथामृतसरः प्रियम् ॥ ७॥

चतुर्वेदाः पुराणानि सर्वोपनिषदस्तथा ।
रामायणं भारतं च गीता षड्दर्शनानि च ॥ ८॥

जैनागमास्त्रिपिटकः गुरुग्रन्थः सतां गिरः ।
एष ज्ञाननिधिः श्रेष्ठः श्रद्धेयो हृदि सर्वदा ॥ ९॥

अरुन्धत्यनसूय च सावित्री जानकी सती ।
द्रौपदी कन्नगेए गार्गी मीरा दुर्गावती तथा ॥ १०॥

लक्ष्मी अहल्या चन्नम्मा रुद्रमाम्बा सुविक्रमा ।
निवेदिता सारदा च प्रणम्य मातृ देवताः ॥ ११॥

श्री रामो भरतः कृष्णो भीष्मो धर्मस्तथार्जुनः ।
मार्कंडेयो हरिश्चन्द्र प्रह्लादो नारदो ध्रुवः ॥ १२॥

हनुमान् जनको व्यासो वसिष्ठश्च शुको बलिः ।
दधीचि विश्वकर्माणौ पृथु वाल्मीकि भार्गवः ॥ १३॥

भगीरथश्चैकलव्यो मनुर्धन्वन्तरिस्तथा ।
शिबिश्च रन्तिदेवश्च पुराणोद्गीतकीर्तयः ॥ १४॥

बुद्ध जिनेन्द्र गोरक्षः पाणिनिश्च पतंजलिः ।
शंकरो मध्व निंबार्कौ श्री रामानुज वल्लभौ ॥ १५॥

झूलेलालोथ चैतन्यः तिरुवल्लुवरस्तथा ।
नायन्मारालवाराश्च कंबश्च बसवेश्वरः ॥ १६॥

देवलो रविदासश्च कबीरो गुरु नानकः ।
नरसी तुलसीदासो दशमेषो दृढव्रतः ॥ १७॥

श्रीमच्छङ्करदेवश्च बंधू सायन माधवौ ।
ज्ञानेश्वरस्तुकाराम रामदासः पुरन्दरः ॥ १८॥

बिरसा सहजानन्दो रमानन्दस्तथा महान् ।
वितरन्तु सदैवैते दैवीं षड्गुणसंपदम् ॥ १९॥

रविवर्मा भातखंडे भाग्यचन्द्रः स भोओपतिः ।
कलावंतश्च विख्याताः स्मरणीया निरंतरम् ॥ २०॥

भरतर्षिः कालिदासः श्रीभोजो जनकस्तथा ।
सूरदासस्त्यागराजो रसखानश्च सत्कविः ॥ २१॥

अगस्त्यः कंबु कौन्डिण्यौ राजेन्द्रश्चोल वंशजः ।
अशोकः पुश्य मित्रश्च खारवेलः सुनीतिमान् ॥ २२॥

चाणक्य चन्द्रगुप्तौ च विक्रमः शालिवाहनः ।
समुद्रगुप्तः श्रीहर्षः शैलेंद्रो बप्परावलः ॥ २३॥

लाचिद्भास्कर वर्मा च यशोधर्मा च हूणजित् ।
श्रीकृष्णदेवरायश्च ललितादित्य उद्बलः ॥ २४॥

मुसुनूरिनायकौ तौ प्रतापः शिव भूपतिः ।
रणजितसिंह इत्येते वीरा विख्यात विक्रमाः ॥ २५॥

वैज्ञाअनिकाश्च कपिलः कणादः शुश्रुतस्तथा ।
चरको भास्कराचार्यो वराहमिहिर सुधीः ॥ २६॥

नागार्जुन भरद्वाज आर्यभट्टो वसुर्बुधः ।
ध्येयो वेंकट रामश्च विज्ञा रामानुजायः ॥ २७॥

रामकृष्णो दयानंदो रवींद्रो राममोहनः ।
रामतीर्थोऽरविंदश्च विवेकानंद उद्यशः ॥ २८॥

दादाभाई गोपबंधुः टिळको गांधी रादृताः ।
रमणो मालवीयश्च श्री सुब्रमण्य भारती ॥ २९॥

सुभाषः प्रणवानंदः क्रांतिवीरो विनायकः ।
ठक्करो भीमरावश्च फुले नारायणो गुरुः ॥ ३०॥

संघशक्ति प्रणेतारौ केशवो माधवस्तथा ।
स्मरणीय सदैवैते नवचैतन्यदायकाः ॥ ३१॥

अनुक्ता ये भक्ताः प्रभुचरण संसक्तहृदयाः ।
अविज्ञाता वीरा अधिसमरमुद्ध्वस्तरि पवः ॥
समाजोद्धर्तारः सुहितकर विज्ञान निपुणाः ।
नमस्तेभ्यो भूयात्सकल सुजनेभ्यः प्रतिदिनम् ॥ ३२॥

इदमेकात्मता स्तोत्रं श्रद्धया यः सदा पठेत् ।
स राष्ट्रधर्म निष्ठावानखंडं भारतं स्मरेत् ॥ ३३॥

॥ विश्वधर्म की जय ॥

Please send corrections to sanskrit@cheerful.com
Last updated February 28, 1999